# शास्त्रशिक्षणे गुणवत्तासंवर्धनाय सप्तपदी

**प्रो. देवदत्तसरोदे**
आचार्यः
के.सं.विश्वविद्यालय नवदेहली
devdatta_aarya@yahoo.com

**अर्थकामेष्वसक्तानां धर्मज्ञानंविधीयते ।**
**धर्मजिज्ञासमानानांप्रमाणं परमं श्रुतिः ।।** मनु.
अपि
**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।**
**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ।।** गीता

भारतीयपरम्परायां धर्माधर्मयोः सदसतोः कर्त्तव्याकर्त्तव्ययोः विवेकं कर्तुं श्रुतिस्मृतिशास्त्रप्रमाण्यन्तरेण नास्त्यन्यच्छरण्यम् अत एव एवं जातीयकं प्रमाणभूतं शास्त्रम् अस्मत्संस्कृतेः जीवातुभूतं वरीवर्ति । शास्त्राणि नैकानि सन्ति, तद्यथा – व्याकरणशास्त्रं, निरुक्तशास्त्रं , योगशास्त्रं धर्मशास्त्रं, ज्योतिषशास्त्रं,गणितशास्त्रं, इत्यादीनि । एतेषां शास्त्राणां शिक्षणपरम्परा अतिप्राचीनकालाद् अजस्रम् अनुवर्तते । तत्र शास्त्रशिक्षणेन शास्त्रस्यैषा परम्परा रक्षिता भावति , किञ्चानेन शास्त्रज्ञानेन ऐहिकामुष्मिकफलावाप्तये सौकर्यं भवति अपि च – ज्ञानं मनुजस्य तृतीयं नेत्रम् इति उक्तत्वात् नहि ज्ञानेन सदृशं पवित्रमिह विद्यते इति गीता वचनेन ज्ञायते यत् भारते ज्ञानं मेव सदा सर्वथा मूर्धनि विराजते । ज्ञानमयानि इमानि शास्त्राणि तेषां शिक्षणपरम्परा प्राणपणेन रक्षिता संवर्धिता च परन्तु गच्छता कालेन सैषा शिक्षणपरम्परा तस्याः गुणवत्ता च अनुदिवसं क्षीयमाणा विलोक्यते । अतः को नाम अत्र हेतुर्यत् शास्त्रशिक्षणेगुणवत्तायाः ह्रासो जायते ? कथङ्कारमेषा शास्त्रशिक्षणगुणवत्ता संरक्षिता संवर्धिता च भविष्यति तदत्र विचार्यते ।

## शास्त्रस्य निर्वचनम् -

शास्त्रं कस्मात् ? शास्तीति शास्त्रम्, मार्गदर्शनं विदधाति, बुद्धिं विशारदीकरोति सन्मार्गं नयति , ज्ञाननेत्रमुन्मीलयति, विज्ञानं विकचीकरोति तच्छास्त्रं । धर्मज्ञानविज्ञानमयानां शास्त्राणां गुणवत्तायुतं शिक्षणं लोकहिताय कल्पते इति नास्ति द्वैतमत्र विपश्चिदपश्चिमानाम् ।

गुणवत्ता - का नु खलु गुणवत्तेति जिज्ञासायाम् उच्यते, यस्य कस्यापि यद्गुणविशिष्टस्यभाव: स: तस्य गुणवत्ता । यथा – पवित्रं जलं , शुद्धं जलं ,जलस्य गुणवत्ता सूच्यते अर्थात् जले ये घटका: यावत्यो मात्रा भवेयु: यदि तावत्यो मात्रा विलसन्ति तर्हि तस्मिन् जले गुणवत्ता विद्यते इति विजानीम: । यदि जले विद्यमानानामपेक्षितानां घटकानाम् अनुपातमात्राया: विपर्यासेऽहि सञ्जाते ,जलस्य गुणवत्ता क्षीयते जलञ्च स्वधार्मान् जहाति । एवमत्रापि शिक्षणे शिक्षणात् परं जायमानेऽधिगमे यदि सङ्कल्पितोद्देश्यानि अभिष्टानि लक्ष्याणि न सिध्यन्ति तर्हि तदैवमुच्यते शिक्षणे गुणवत्ता क्षीणेति , सैषा गुणवत्ता , शिक्षणस्योत्कृष्टस्तर: कथं प्रापणीय: इति न: प्रथम: कल्प: । तत्र तावत् शिक्षणं नाम किम् ?

**शिक्षणम्-** स्वनिष्ठज्ञानं परत्र सङ्क्रामयितुमुपयुज्यमानम् अधिगमैकनिष्ठं निर्दुष्टं साधनम् इति ।शिक्षणे घटकचतुष्टयमपेक्षितं तच्च आचार्य:,अन्तेवासी, विषय:(विद्या), प्रवचनम् इति । एतदेव शिक्षाध्याये तैत्तीरीयोपनिषदि ऋषिणा एवं न्यगादि – आचार्य: पूर्वरूपम् अन्तेवास्युत्तररूपं, विद्या, सन्धि:, प्रवचनं सन्धानम् इत्यधिविद्यम् । अत्र चारु शिक्षणकर्मसम्पादनाय विद्याप्राप्तये घटकचतुष्टयं सूचितम् ।

**शास्त्रशिक्षणे गुणवत्तासंवर्धनाय प्रथमं पदम् उपायो वा अधिकारी अन्तेवासी** – कस्यापि शास्त्रशिक्षणात् प्राग् एतत् सम्प्रधार्यं यद् आगत: विद्यार्थी अस्य शास्त्रशिक्षणस्य पात्रात्वं बिभर्ति नवेति । प्रतिशास्त्रं शिक्षणाय अनुबन्धचतुष्टयं निर्दिष्टं तत्र प्रथमानुबन्ध: अस्य शास्त्रस्य अधिकारी क: ? छात्र:, अन्तेवासी वा कन्थं स्यात् ? इति जिज्ञासायामुच्यते गीतायाम् –

**श्रद्धावान् लभते ज्ञानं तत्पर: संयतेन्द्रिय: । ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।।**

एवंजातीयक: छात्र: यदि विद्यार्ह: शास्त्रशिक्षणपात्रत्वं बिभर्ति तर्हि तस्मै अवश्यं विद्या देया । तथा च निरुक्ते ‘ **विद्या ह वै ब्राह्मणमाजगाम शेवधिष्टेऽस्मि गोपाय मां वीर्यवती यथा स्याम मा ब्रूहि असूयकाय, अनृजवे**, इति अत: पात्रे प्रदत्ता विद्या फलवती भवति । यदि छात्रे पात्रता नास्ति तर्हि मनोवैज्ञानिकरीत्या उपायान् विधाय रुचिं सम्पाद्य मानसिकबौद्धिकबलं संवर्ध्य पात्रत्वं जनयेत् आचार्य: ।

**द्वितीयं पदम् उपायो वा आचार्यः -**

**आचार्यः कस्माद् ? आचारं ग्राहयति आचिनोति अर्थान् आचिनोति बुद्धिमिति वा** । आचारवान् सन् आचार्यः उपदेशमन्तरेण केवलं स्वीयाचारणेन आचारं ग्राहयितुमलं भवति । **आचिनोति अर्थम्** – बहुश्रुतः आचार्यः शब्दार्थसम्बन्धेन नाना विद्याः कलाः साहत्यं ज्ञानं विज्ञानं वा शिष्यान् बोधयितुं प्रभवति । अनेन छात्राः नैकासु कलासु, विद्यासु ज्ञाने, विज्ञाने च नैपुण्यमासादयन्ति । **आचिनोति बुद्धिम्** – छात्रेषु अन्तर्निहितं सामर्थ्यं, शक्तिं, बुद्धिं, प्रतिभां विकासयति । कुशलाध्यापकः छात्रस्य बौद्धिकं विकासं सम्पादयति । शास्त्रपाण्डित्यम्, अध्यापनकौशलम्,सदाचारः, वृत्तिं प्रति समर्पणभावः एतद् गुणचतुष्टयं प्रत्येकं गुणवति श्रेष्ठे आचार्ये अवश्यं भवेत् । इत्थंभूतः सदाचारी, ज्ञानी, अध्यापनपटुः समर्पितः अध्यापकः शास्त्रसंरक्षणं कर्तुं प्रभवति किञ्च शास्त्रशिक्षणेगुणवत्तामपि प्रतिष्ठापयति ।

**तृतीयं पदम् उपायो वा आचार्यान्तेवासिनोःसङ्कल्पः -**

गुणवत्तायुतविद्याप्राप्त्यै आचार्यान्तेवासिनोः कश्चन दृढतरः सङ्कल्पः स्यात् । तथा च **सहनाववतु सह नौ भुनक्तु सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ।।** तैत्तिरीयोपनिषद् इति तैत्तिरीयवचनेन ज्ञायते यद् आभ्यां गुरुशिष्याभ्यामधीतं तेजस्वि भवेत् गुणवत्तायुतं स्यात् सफलं भवेत् इति प्रार्थना कञ्चन सङ्कल्पं सूचयति । गुणवत्तायुतशिक्षणसम्पादनाय काचित् कार्ययोजना स्यात्, अपि च समयसापेक्षं लक्ष्यनिर्धारणं स्यात् तद्यथा साप्ताहिकं शैक्षिकलक्ष्यं , मासिकं शैक्षिकलक्ष्यं, त्रैमासिकं शैक्षिकलक्ष्यं, षाण्मासिकं शैक्षिकलक्ष्यं,वार्षिकं शैक्षिकलक्ष्यं इमानि शैक्षिकलक्ष्याणि सङ्कल्पितोद्देश्यानि प्राप्तुं कार्ययोजनानुगुणं प्रयत्नो भवेत् । शैक्षिकलक्ष्यं विना शिक्षणम् दिक्सूचीहीना नौकेव मोघमेव ।

**चतुर्थं पदम् उपायो वा योजनायाः क्रियान्वयनं , प्रभावि-शिक्षणम्** –

अध्ययनं तपः इति श्रूयते । सर्वे नैरन्तर्येण तपश्चरितुं न प्रभवन्ति किञ्च केचन अनध्यायप्रियाः छात्राः भावन्ति, तेषां विद्याध्ययनं प्रति रुचिं समुत्पाद्य रुचिरं शिक्षणं कर्तुं यदि अध्यापकाः न प्रवर्तेरन् तर्हि कथं शिक्षणे गुणवत्ता आयाति ? शिक्षणं यदि सातात्येन प्रभाविशिक्षणसाधनैः छात्रमनोविज्ञानं विदित्वा यदि विधीयते तर्हि तच्छिक्षणम् अवश्यं साफल्यमवाप्नोति । अतः प्रतिदिनं प्रतिक्षणं कणं कणं ज्ञानप्रदानाय अध्यापकाः , तत्सम्पादनाय च्छात्राः तत्पराः स्युः तदानीमेव अधीतं तेजस्वि यशस्वि

सफलञ्च भवति । दृश्यते हि लोके शास्त्रशिक्षणे गुणवत्तासंवर्धनाय चिन्तनं क्रियते गोष्ठी आयोज्यते, विचारमन्थनं विधीयते परन्तु अस्य क्रियान्वयनं क्वाचित्कं दृश्यते । शास्त्रे कथितं यस्तु क्रियावान् स पण्डित: अत: लक्ष्यसाधानानुकूलं कर्मापेक्षितम् । य: स्वयं सङ्कल्पितं कुरुते स एव फलभाग् भवति।

**पञ्चमं पदम् उपायो वा भाषाकौशलानि** –

शास्त्रशिक्षणेगुणवत्तासंवर्धनाय श्रवणभाषणपठनलेखनादीनि चत्वारि भाषाकौशलानि अपेक्षितानि । भाषा भावसञ्चारस्य सशक्तं साधनं वरीवर्ति । भाषाकौशलान्यन्तरेण ज्ञानसम्प्रेषणं छात्रेषु दुष्करं खलु । अत: अध्यापकेषु छात्रेषु इमानि भाषाकौशलानि अवश्यं स्यु: येन ज्ञानस्य सम्प्रेषणं शिक्षणञ्च तस्य अधिगमश्च सम्पद्यते । यत: भाषाकौशलान्यन्तरा शिक्षणमधिगमश्च दुष्कर: अत: ज्ञानस्य सम्प्रेषणम्,छात्राध्यापकयो: परस्परं सन्धानाय अपेक्षितं प्रवचनं च यदा न सम्भवति तदा शास्त्रशिक्षणं सर्वथा अशक्यम् । प्रवचनेन छात्रेषु विद्यमानभाषाज्ञानेन मिथ: छात्राध्यापकयो: सन्धानं भवितुमर्हति । पाठितौ विषयो गतार्थो भवति ।

**षष्ठं पदम् उपायो वा स्वाध्याय: सब्रह्मचारिभि: चर्चा, अभ्यास: --**

महाभाष्यकार: ब्रूते **चतुर्भि: प्रकारैर्विद्योपयुक्ता भवति आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेन च** । यदा छात्रा: गुरो: शास्त्राध्ययनं कुर्वन्ति प्रतिदिनं पाठं पठन्ति तत: परं एकान्ते स्वाध्यायं कुर्यु: , अनेन अधीतं बोधगम्यं भवति । अनधिगतम् अस्पष्टविषयं विचिन्त्य विमर्शनं विदध्यु: तेन अधीतं सुग्राह्यं भवति । बृहदारण्यकोपनिषदि याज्ञवल्क्येन एवमभाषि आत्मा **वारे द्रष्टव्य: ,श्रोतव्यो, मन्तव्यो, निदिधासितव्य:** इति । अत: गुरुमुखात् शास्त्रश्रवणात् परं श्रुतस्य स्वाध्यायो मननं, तत: परं निदिध्यासनं तत: साक्षात्कारं कुर्यु: । यदि स्वाध्याये सति संशये सब्रह्मचारिभि: चर्चां कुर्यु: शास्त्रार्थं तत्त्वं वा विजानीयु: । यदि श्रवणात् परं मननं निदिध्यासनं न कुर्वन्ति न च सतीर्थजनै: साकं चर्चां विदधति तर्हि अधीतं मनागपि स्थिरं , चिरं स्थातुं न प्रभवति । अधीतं दृढं तदानीमेव भवति यदि तस्य सम्यक् अभ्यासो विधीयते । को नाम अभ्यास: ? अभ्यासो नाम आवृत्ति: मुहुर्मुहु: आवर्तनम् । स चाभ्यास: तत् फलञ्च तदानीमेव दृढीयो भवति यदायमभ्यास: दीर्घकालपर्यन्तं नैरन्तर्येण श्रद्धया क्रियते । तथा चोक्तम् – **स तु दीर्घकालनैरन्तर्येण सत्कारासेवितो दृढभूमि:** (योग- १,१४) अयमभ्यास: दीर्घकालपर्यन्तं सातत्येन श्रद्धया, तपसा, विद्यया, ब्रह्मचर्येण आसेवित: दृढभूमिर्भवति । अत: शास्त्रशिक्षणे गुणवत्तासंवर्धनाय विचारपूर्वकोऽभ्यासोऽपेक्षित: ।

**सप्तमं पदम् उपायो वा परीक्षा, मूल्याङ्कनम्, गुणदोषविवेचनम्** –

अध्यापकेन पाठितस्य, च्छात्रेण अधिगतस्य च परिज्ञानाय परीक्षा अनिवार्या । इयं परीक्षा समीचीनतया कर्तव्या,येन मूल्याकनं कर्तुं सौकर्यं जायेत । अध्यापक: प्रत्यहं चिन्तयेत् यत् मम शिक्षणं कियत् साफल्यं भजते ? कुत्र दोषा: सन्ति ? कथं परिष्कारो विधातव्य: ? किञ्च च्छात्राधिगमे कुत्र कष्टम् अन्तरायो विद्यते ? कियदनेनाधिगतं कियच्च शिष्टं ? तत्सर्वं सुसूक्ष्मतया विचार्य गुणदोषपुरस्सरं मूल्याङ्कनं विदध्यात् यत्ने कृते यदि न सिद्ध्यति कोऽत्रदोष: इति स दोष: मृग्य: । यदि एवंरीत्या सप्तपदै:, सप्तोपायै: शास्त्रशिक्षणं विदध्मश्चेत् नूनं कृतं शिक्षणम् अधिगतं ज्ञानं यशस्वि, तेजस्वि, गुणवत्तायुतं भवति नास्त्यत्र संशीतिलेश: इति निश्चप्रचम् ।